# Shri Chandrashekhara Bharati Sadguru Shodashi

# શ્રીચન્દ્રશેખરભારતિ સદ્ગુરુષોડશી

## Document Information

Text title : Shri Chandrashekhara Bharati Sadguru Shodashi

File name : sadguruShoDashI.itx

Category : deities_misc, gurudev, ShoDasha

Location : doc_deities_misc

Proofread by : Ravi Venkatraman

Description/comments : Bhakta Kusumanjali Handful of Devtional Flowers on the Occasion of the Shri Chandrashekara Nakshatramahotsava (1912-1938) of Sri Chandrasekhara Bharati Swami of Sringeri

Latest update : October 17, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 17, 2021

*sanskritdocuments.org*

# શ્રીચન્દ્રશેખરભારતિ સદ્ગુરુષોડશી

શિવસ્વરૂપમિન્દુકાન્તિશોભિતં શિવઙ્કરં
 શિવાચ્યુતામ્બુજોદ્ભવાત્મકં મદાન્તકપ્રભુમ્ ।
દ્વિજાર્ચિતં પ્રજામહીમહેન્દ્રસંશ્રિતાઙ્ઘ્રિકં
 શ‍ૃઙ્ગશૈલપીઠનાથમાશ્રયામિ સન્તતમ્ ॥ ૧॥

દેશિકેન્દ્રચન્દ્રશેખરાભિધાનશોભિતે
 શ્રીનૃસિંહભારતીશહસ્તપદ્મસમ્ભૃતે ।
શઙ્કરાર્યસદ્ગુરુપ્રતિષ્ઠિતાદિપીઠગે
 ખેલતુ પ્રતિક્ષણં મનો મદીયમન્વહમ્ ॥ ૨॥

ચાક્ષુષાખ્યયા સુદક્ષિયૈવ માં પુરા પ્રભુ-
 ર્યઃ ક્ષણેઽકરોદ્ભુજિષ્યમક્ષરામ્બિકાત્મકઃ ।
મીનનેત્રયા પ્રદત્તયાજ્ઞયાશ્રિતો મયા
 લોકદેશિકં તમેકમેવ સન્તતં ભજે ॥ ૩॥

દણ્ડપાણિમણ્ડકોટિમણ્ડલાર્ચિતાઙ્ઘ્રિકં
 વૈદિકાધ્વવૈરિતૂલચણ્ડમારુતં પ્રભુમ્ ।
ચણ્ડિકાસરોજપાદપૂજકં બુધાગ્રણી-
 ઋષ્યશ‍ૃઙ્ગમૌનિરાટ્તપોવનેશ્વરં ભજે ॥ ૪॥

ભસ્મપુણ્ડ્રપાવકત્રિરેખયા વિરાજિતં
 સુધામયૂખશેખરાક્ષમાલયા સ્ફુરદ્ગલમ્ ।
ગુણત્રયાત્મરેખયાપ્યલઙ્કૃતાબ્જપીઠગં
 ચન્દ્રશેખરાર્યદેશિકં તમેકમાશ્રયે ॥ ૫॥

આત્મરૂપદર્શને સદાઽપિ તુષ્ટમાનસં
 ભાવનાખ્યવેદશીર્ષભાવનાવિશારદમ્ ।
પાવનાત્મવિદ્યયા પ્રકાશિતાબ્જવક્ત્રકં
 દેશિકેન્દ્રચન્દ્રશેખરાર્યરાજમાશ્રયે ॥ ૬॥

હસ્તતાલમોદનેન વૃષ્ટિકારકં પ્રભું
    ચક્રરાજનાયિકાસમર્ચકં તમોહરમ્ ।
શુદ્ધવિદ્યયાશ્રિતાત્મશુદ્ધતત્ત્વબોધકં
    ચન્દ્રશેખરાર્યદેશિકં ભજે વિમુક્તયે ॥ ૭॥

દેવકીસુતેન સત્વમાર્ગપાલનેચ્છુના
    પ્રેષિતં સુવર્ણપક્ષમામનન્તિ યં ગુરુમ્ ।
પઞ્ચનાગબન્ધને પ્રભું પરાત્મદર્શન -
    પ્રદં તમાશ્રયામિ ચન્દ્રશેખરાર્યદેશિકમ્ ॥ ૮॥

શિલાસુવર્ણયોર્દરિદ્રવિત્તશાલિનોસ્તથા
    પઙ્કરત્નયોશ્ચ મૂર્ખવિજ્ઞયોર્જડાર્યયોઃ ।
યક્ષરક્ષસોર્ધુરીણમાનુષાખ્યયોરસૌ
    સમપ્રવૃત્તિકો જયત્યવાપ્ય માનસં ગુરુઃ ॥ ૯॥

ધનેન કર્મણા પ્રજાભિરોંપદાર્થમવ્યયં
    કદાઽપિ વા ચ ન સ્મેરદિતિ પ્રબોધકં પ્રભુમ્ ।
જ્ઞાનકારકં નતાર્તિહારિણં સદા હૃદા
    કદા ભજેઽઞ્જલિં વહન્ગુરું ભવાબ્ધિતારકમ્ ॥ ૧૦॥

વિરાગલોકસેવિતં વિરક્તિમાર્ગસૂચકં
    વિદ્યયાવિલાસવન્મુખં વિનીતિનાયકમ્ ।
વિશઙ્કટં વિશારદં વિશલ્યભોગદાયકં
    વિશુદ્ધતૃપ્તમાનસં નમામિ દેશિકપ્રભુમ્ ॥ ૧૧॥

મન્દહાસરમ્યદન્તપઙ્ક્તિશોભિતાનનં
    બિન્દુતત્ત્વબોધકં નિરન્તરેણ યોગિનામ્ ।
અન્ધકારપાપહન્તૃભાસ્કરં શિવાઽદ્વયં
    બન્ધમોચકં તમેકમાશ્રયામિ સદ્ગુરુમ્ ॥ ૧૨॥

પાદુકાઽમૃતેન સર્વનમ્રલોકરક્ષકં
    ચાક્ષુષામૃતેન મોહનાશકં સદા નૃણામ્ ।
વાચિકામૃતેન નૈગમાનુકૂલશિક્ષકં
    માતૃકાક્ષરામૃતાત્મકં નમામિ સદ્ગુરુમ્ ॥ ૧૩॥

અખણ્ડમણ્ડલેશ્વરત્રિખણ્ડમન્ત્રબોધકં

વિકુણ્ઠકુણ્ડલીશયાત્મકં મહાશિવાર્ચકમ્ ।
મહાણ્ડકોટિમાતૃકાઙ્ઘ્રિપઙ્કજે સુભક્તિદં
પ્રચણ્ડદુઃખહારિણં શરણ્યમાશ્રયે ગુરુમ્ ॥ ૧૪॥

તુલાખ્યમેચકે મખસ્ય સઙ્ક્રમે સમુદ્ભવં
સુમેષકૃષ્ણષષ્ટ્યુપાગમેઽભિષિક્તમાસને ।
સુખપ્રદં નમત્તતેઃ શિવં શિવપ્રદાયકં
સુચન્દ્રશેખરાર્યદેશિકં તમેકમાશ્રયે ॥ ૧૫॥

તવાઙ્ઘ્રિપદ્મયોરિમાં નવાં સ્તુતિં સમર્પયે
ગૃહાણ નમ્યશારદાખ્યપીઠમધ્યગ પ્રભો ।
સદાઽવ માં સદાશિવ શ્રુતે રહસ્યબોધનૈઃ
પુનર્નમામિ દેશિકેન્દ્ર ચન્દ્રશેખરાર્ય ભોઃ ॥ ૧૬॥

ઇતિ મન્ત્રેશ્વરશર્મણા વિરચિતા સદ્ગુરુષોડશી સમાપ્તા ।

(મધુરાપુરિવાસ્તવ્યેન મુમ્બાપુરીસ્થપત્રિકાપ્રકટનાધ્યક્ષેણ
શ્રીગુરુપાદુકાશેખરેણ મન્ત્રેશ્વરશર્મણા વિરચિતા)
(Author: Sri Madura S. Mantresvara Sarma, Journalist
and Editor, Kaiser-i-Hind, Bombay.)
A garland of sixteen verses laid at the blessed feet of
His Holiness Sri Chandrasekhara Bharati Mahaswamigal.

Proofread by Ravi Venkatraman

*Shri Chandrashekhara Bharati Sadguru Shodashi*
pdf was typeset on October 17, 2021

Please send corrections to *sanskrit@cheerful.com*